
षष्ठः पाठः

# तत् त्वम् असि



**हे सौम्य! स एव आत्मा। तत् एव सत्। तत् त्वम् असि।**

**उमेशः** रमे! पश्य एतत् चित्रम्। कः एषः वृक्षः?

**रमा** अयं तु वटवृक्षः प्रतीयते। किं न पश्यसि अस्य दीर्घाः शाखाः पृथ्वीं स्पृशन्ति।

**उमेशः** आम्, पश्यामि। वट एव अयम्। परन्तु कोऽयम् ऋषिः बालकः च?

**रमा** आचार्या आगच्छति, तामेव पृच्छामः।

**उमेशः** आचार्ये! कोऽयम् ऋषिः?

**आचार्या** पाठं पठित्वा ज्ञास्यामः।

**रमा** आचार्ये! कुतः गृहीतः एषः पाठः?

**आचार्या** छान्दोग्य-उपनिषदः।

**उमेशः** आचार्ये! उपनिषद् किं भवति?

**आचार्या** उपनिषदः नाम ते ग्रन्थाः येषु अमूल्यम् आत्मज्ञानम् उपदिष्टम्।

**रमा** एवम्। अतीव उत्सुकाः वयम् एतं पाठं पठितुम्।

षष्ठः पाठः

# तत् त्वम् असि

महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत्। द्वादशवर्षीयं तं पुत्रं पिता आरुणिः उवाच – हे श्वेतकेतो! गुरुं प्रति गच्छ अध्ययनार्थं यतः सौम्य! अस्मत्कुलीनः अनधीत्य न भवति इति। सः पुत्रः आचार्यम् उपेत्य यावत् चतुर्विंशतिवर्षः अभवत् तावत् सः सर्वान् वेदान् सार्थान् अधीत्य पितुः सकाशम् आगच्छत्। सः च 'सर्वश्रेष्ठः अहम्' इति मन्यमानः उद्धतस्वभावः अभवत्। एवम्भूतं पुत्रं दृष्ट्वा पिता उवाच – हे श्वेतकेतो! कः ते उपाध्यायात् अतिशयः प्राप्तः येन त्वं कुलाननुरूपम् उद्धतः असि? जानासि किं तत्, येन श्रुतेन अन्यत् अश्रुतम् अपि श्रुतं भवति, अमतं मतम्, अविज्ञातं च विज्ञातं भवति इति। एतद् अद्भुतं प्रश्नं श्रुत्वा पृच्छति – कथम् इति! इत्युक्तः पिता अधोलिखितदृष्टान्तेन तत्त्वज्ञानं प्रतिपादयति–

**आरुणिः** – श्वेतकेतो! न्यग्रोधफलम् आहर।

**श्वेतकेतुः** – इदं भगवन्!

**आरुणिः** – अत्र किं पश्यसि?

**श्वेतकेतुः** – अणुतराणि इमानि बीजानि।

**आरुणिः** – एषु एकं बीजं भिन्धि।

**श्वेतकेतुः** – भिन्नम्।

**आरुणिः** – अत्र किं पश्यसि?

**श्वेतकेतुः** – न किञ्चन भगवन्।

इदं श्रुत्वा पिता पुत्रम् उवाच – हे सौम्य! पश्य अत्र वटबीजे एव महान् स्थूलः शाखादिमान् न्यग्रोधः वटः उत्पन्नः सन् तिष्ठति। एवम् अणिम्नः स्थूलं जगद् उद्भवति। विश्वसिहि, हे सौम्य! स एव आत्मा। तत् एव सत्। तत् त्वम् असि।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अणिम्नः** (सं०) [अणिमन् पुं०, पं०ए०व०] | सूक्ष्मात् | सूक्ष्मतत्त्व से | out of the minutest atom. |
| **अणुतराणि** (वि०) [अणु+ तरप्; नपुं० प्र०ब०व०] | लघुतराणि | छोटे छोटे | very small, tiny |
| **अतिशयः** (सं०) [पुं०प्र०ए०व०] | वैशिष्ट्यम् | विशेषता | excellence |

| | | | |
|---|---|---|---|
| **अध्ययनार्थम्** (अधि+इ+ल्युट् = अध्ययन+अर्थम्) | अध्ययनस्य निमित्तम् | अध्ययन के लिए | for pursuing studies |
| **अनधीत्य** (अव्य०) [न अधीत्य, अधि+इ+ल्यप्=अधीत्य] | न पठित्वा | न पढ़ कर; बिना पढ़े | having not studied. |
| **अमतं मतम्** (भवति) | अतर्कितं तर्कितं (भवति) | बिना विचार किया हुआ (मतम् अर्थात्) विचारा हुआ हो जाता है | that which is beyond comprehension becomes comprehended |
| **अविज्ञातं विज्ञातम्** | अनिश्चितं निश्चितं भवति | अनिश्चित निश्चित हो जाता है | uncertain becomes certain. |
| **अश्रुतं श्रुतं भवति** | अनाकर्णितम् आकर्णितं भवति | न सुना हुआ भी सुना हुआ हो जाता है | unheard becomes heard. |
| **अस्मत्कुलीनः** (वि०) [पुं०, प्र०ए०व०] | अस्माकं कुले जातः | हमारे कुल में उत्पन्न | born in our family. |
| **आचार्यमुपेत्य** आचार्यम्+उपेत्य [उप+इ+ल्यप् = उपेत्य] | गुरोः समीपं गत्वा (उप उपसर्गयोगे द्वितीया) | आचार्य के पास जाकर | having approached the teacher. |
| **आहर** (क्रि०) [आ+हृ, लो० म०पु०ए०व०] | आनय | लाओ | bring. |
| **इत्युक्तः**, इति+उक्तः, इति (अव्य०) [ब्रू, वच्+क्त, पुं० प्र०ए०व०] | एवं प्रकारेण कथितः (पिता) | इस प्रकार कहे गये। (पिता ने) | having been thus told. |
| **उत्पन्नः सन् तिष्ठति** | तस्य सूक्ष्मस्य अदृश्यमानस्य बीजस्य कार्यभूतः स्थूलशाखा स्कन्धफलपलाशवान् वटवृक्षः एव उत्पद्यते; जायमानः विराजते। | बीज की न दिखाई देने वाली सूक्ष्म अणिमा का कार्यभूत यह मोटी शाखा स्कन्ध, फल और पत्तों वाला महान् वट वृक्ष उत्पन्न होता हुआ खड़ा है | the huge banyan tree exists being born from that minutest energy hidden in the seed. |
| **उद्धतस्वभावः** (वि०)[उद्धतः स्वभावः यस्य सः (ब०व्री०)] | गर्वान्वितः | घमण्डी स्वभाव वाला | arrogant. |

| | | | |
|---|---|---|---|
| **उद्भवति**<br>(क्रि०) [उत्+ भू+लट्, प्र०पु०ए०व०] | जायते | पैदा होता है | takes birth. |
| **उवाच**<br>(क्रि०) [ब्रू, वच्० लिट् प्र०पु०ए०व०] | अवदत् | कहा | said. |
| **एवं भूतम्**<br>(वि०) | तादृशम् उच्छृङ्खलं (पुत्रम्) | उद्दण्डी वृत्ति वाले (पुत्र को) | to one who has become arrogant like this. |
| **न किञ्चन**<br>(न) (अव्य०) किम्+चन (अनिश्चयार्थे) | न किमपि | कुछ भी नहीं | nothing. |
| **कुलाननुरूपम्**<br>(क्रि०वि०) [न अनुरूपम् इति अननुरूपम् (नञ् त० पु०) कुलस्य अननुरूपम् (ष०त०पु०)] | यत् तु उच्चकुलयोग्यं न वर्तते | जो उच्च कुल के योग्य नहीं है | not befitting the noble family. |
| **तत् त्वम् असि** | त्वम् तदेव ब्रह्म असि। | तुम वही ब्रह्म हो। | thou art that supreme being. |
| **तत् एव सत्**<br>[अस्+शतृ=सत् नपुं०] | तत् ब्रह्म एव सत् सत्यम् | (अस्तित्व) वह ब्रह्म ही सत्य है | that Supreme Being is the real truth. |
| **तत्त्वज्ञानम्**<br>(सं) | सृष्टितत्त्वबोधः | सब कुछ अन्तिम सत्य, परम सत्य, अर्थात् ब्रह्म है, अतः सत्य के ज्ञान को ही तत्त्वज्ञान कहते हैं 'तत्त्व' का अर्थ है सृष्टि के आधारभूत तत्त्व, विराट् सृष्टि का ज्ञान | the knowledge of Ultimate Reality, final truth, "the Brahman. the word ''तत्त्व'' means the basic elements of the creation; ''तत्त्वज्ञान'' means the knowledge of creation. |
| **दृष्टान्तः**<br>(सं०) [पुं० प्र०ए०व०] | उदाहरणम् | उदाहरण | example. |
| **न्यग्रोधः**<br>(पु०) | बहुपाद् वटः, वटवृक्षः [न्यग्रोधो बहुपाद्वटः (अमरकोशे)] | बड़ का पेड़ | banyan tree. |
| **प्रतिपादयति**<br>(क्रि०) [प्रति+पद्+णिच्+लट् प्र०पु०ए०व०] | (दृष्टान्तेन) बोधयति | उदाहरणों की सहायता से समझाता है | explains (it) with illustrations. |

| | | | |
|---|---|---|---|
| **भगवन्**<br>(वि०) [भग+मतुप् पुं० सम्बो०ए०व०] | हे भगवन् | सम्मानित, श्रद्धेय | adored one! respected. |
| **भिन्धि**<br>(क्रि०) [भिद्, लो०म०पु०ए०व०] | भेदनं कुरु | फोड़ो | break. |
| **भिन्नम्**<br>(वि०) [भिद्+क्त] (नपुं०, प्र०ए०व०) | भेदनं कृतम् | फोड़ दिया गया | broken. |
| **मन्यमानः**<br>(वि०) [मन्+आ +शानच् पुं०, प्र०ए०व०] | एवं मतिं कुर्वाणः | मानते हुए | regarding (himself). |
| **शाखादिमान्**<br>(वि०) [शाखादि+मत्] (पुं० प्र०ए०व०) | शाखादिभिः युक्तः | शाखा पत्रों आदि से युक्त | having branches and leaves etc. |
| **सकाशम्**<br>(अव्य०) | समीपे | पास में | near. |
| **सत्**<br>(सं०) [नपुं०, प्र०ए० व०] (अस्ति इति सत्) | सत्ता; सत्यम् | वास्तविक रूप से विद्यमान; सत्य | existence; truth. |
| **सन्**<br>(वि०) (पुं० प्र०ए०व०) [अस्+शतृ] | भवन् | होता हुआ | being. |
| **सार्थान्**<br>(वि०) (पुं० द्वि०ब०व०) [अर्थेन सह विद्यमानाः तान् (वेदान्)(ब०व्री०)] | अर्थसहितान् | अर्थसहित | with meanings. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| कुलाननुरूपम् | = | कुल+अननुरूपम् | गुरुं प्रति | = | गुरुम्+प्रति |
| जगद् उद्भवति | = | जगत्+उद्भवति | स एव | = | सः+एव |
| इदं भगवन् | = | इदम्+भगवन् | | | |

### सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| उद्धतः+असि | = | उद्धतोऽसि | एषु+एकम् | = | एष्वेकम् |
| कः+ते | = | कस्ते | सर्वश्रेष्ठः+अहम् | = | सर्वश्रेष्ठोऽहम् |
| तत्+एव | = | तदेव | | | |

**संयोगः**

| | | |
|---|---|---|
| आचार्यम् उपेत्य | = | आचार्यमुपेत्य |
| अश्रुतम् अपि | = | अश्रुतमपि |
| त्वम् असि | = | त्वमसि |
| सकाशम् आगच्छत् | = | सकाशमागच्छत् |
| कथम् इति | = | कथमिति |

## अभ्यासः

**1. एकपदेन संस्कृतभाषया उत्तरत –**

(क) श्वेतकेतुः कस्य पुत्रः आसीत्? ..............................

(ख) श्वेतकेतुः कम् उपेत्य वेदान् अपठत्? ..............................

(ग) पिता केन तत्त्वज्ञानं प्रतिपादयति? ..............................

(घ) आरुणिः श्वेतकेतुं किम् आनेतुम् आदिशत्? ..............................

(ङ) श्वेतकेतुः न्यग्रोधफले किम् अपश्यत्? ..............................

(च) स्थूलं जगत् कस्माद् उद्भवति? ..............................

(छ) पिता न्योगोधफलस्य दृष्टान्तेन किं प्रतिपादयति? ..............................

**2. पूर्णवाक्येन संस्कृतभाषया उत्तरत –**

(क) श्वेतकेतुः विद्या प्राप्यं किम् अमन्यत?

..............................................................................................

(ख) आरुणिः श्वेतकेतुं कं प्रश्नम् अपृच्छत्?

..............................................................................................

(ग) सर्वेषु देहेषु कः अस्ति यः अजरः अमरश्च?

..............................................................................................

(घ) वस्तुतः वटबीजे कः तिष्ठति?

..............................................................................................

(ङ) जगति किं सत् अस्ति?

..............................................................................................

**3. अधोलिखितवाक्येषु स्थूलाक्षरपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत –**

(क) आरुणिः **श्वेतकेतोः** पिता आसीत्। ..........................................................

(ख) श्वेतकेतुः **आचार्यम्** उपेत्य वेदान् अपठत्। ..........................................................

(ग) द्वादशवर्षीयं तं पुत्रम् **आरुणिः** उवाच। ..........................................................

(घ) श्वेतकेतुः **वेदान्** आधीत्य आगच्छत्। ..........................................................

(ङ) विद्यां प्राप्य स **आत्मानं** सर्वश्रेष्ठम् अमन्यत। ..........................................................

(च) उद्धतस्वभावः स **पितुः** सकाशम् आगच्छत्। ..........................................................

(छ) पिता दृष्टान्तेन **तत्त्वज्ञानं** प्रतिपादयति। ..........................................................

(ज) श्वेतकेतुः **न्यग्रोधस्य** फलम् आहरति। ..........................................................

(झ) श्वेतकेतुः **फले** बीजानि पश्यति। ..........................................................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'त्वं कुलाननुरूपम् उद्धतः असि'। अत्र 'असि' इति क्रियापदस्य कर्तृपदं किम्? ..............................

(ख) 'अणिम्नः स्थूलं जगद् उद्भवति'। वाक्येऽस्मिन् विशेषणपदं किं प्रयुक्तम्? ..............................

(ग) 'गुरुं प्रति गच्छ अध्ययनार्थम्'। अत्र क्रियापदं किम्? ..............................

(घ) 'समीपम्' इति पदस्य किं पर्यायपदं पाठे प्रयुक्तम्? ..............................

(ङ) 'सूक्ष्मः' इति पदस्य विलोमपदं पाठात् चित्वा लिखत। ..............................

**5. अधोलिखितवाक्यानि कथाक्रमानुसारं पुस्तिकायां लिखत –**

(क) आरुणिः श्वेतकेतुः वटफलम् आनेतुम् अकथयत्।

(ख) श्वेतकेतुः गुरोः सकाशाद् वेदान् अपठत्।

(ग) आरुणिः पुत्रं वटबीजस्य अन्तः द्रष्टुम् अकथयत्।

(घ) वेदान् अधीत्य श्वेतकेतुः अमन्यत-अहं श्रेष्ठः अस्मि।

(ङ) आरुणिः श्वेतकेतुम् आत्मनः विषये उपादिशत्।

(च) वस्तुतः जगति आत्मा एव सत्।

(छ) आत्मज्ञानेन सर्वम् अविज्ञातं ज्ञातं भवति।

**6. शब्दानाम् अर्थैः सह मेलनं कृत्वा लिखत –**

| | | |
|---|---|---|
| (क) अधीत्य | ................................ | समीपं गत्वा |
| (ख) आहर | ................................ | भेदनं कुरु |
| (ग) भिन्धि | ................................ | सूक्ष्मात् |
| (घ) अणिम्नः | ................................ | आनय |
| (ङ) उपेत्य | ................................ | पठित्वा |

**7. पाठात् चित्वा विपरीतार्थान् लिखत –**

**यथा** अनुरूपम् – अननुरूपम्

(क) अधीत्य ................................ (ख) श्रुतम् ................................

(ग) मतम् ................................ (घ) विज्ञातम् ................................

(ङ) दूरम् ................................



## गतिविधिः

**1. परस्परं मिलित्वा वर्गेषु विचार्यताम् ततः लिख्यताम् –**

(क) श्वेतकेतुः किमर्थम् उद्धतस्वभावः अभवत्?

(ख) महर्षिः आरुणिः तं किं प्रतिपादयितुम् इच्छति स्म?

**2. उपनिषदां विषये जानन्तु। प्रमुखाणाम् उपनिषदां च नाम्नां सङ्ग्रहं कृत्वा स्फोरक-पत्रस्य निर्माणं कुर्वन्तु।**



## योग्यताविस्तारः

**(क) पाठपरिचयः टिप्पण्यश्च–**

छान्दोग्योपनिषदः षष्ठाध्यायात् सङ्कलितोऽयम् अंशः। अस्मिन् अध्याये आरुणिः विभिन्नदृष्टान्तैः नववारं 'तत् त्वम् असि' इति वाक्येन आत्मतत्त्वस्य रहस्यानि उद्घाटयति।

**(ख) भावविस्तारः**

**विश्वसिहि** यदा श्रद्धा विश्वासश्च भवतः तदैव ज्ञानस्य प्राप्तिर्भवति। उक्तञ्च रामचरितमानसे–

भवानीशङ्करौ वन्दे श्रद्धाविश्वासरूपिणौ।
याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तःस्थमीश्वरम्।।

**तत् एव सत्** सत् एव सत्यं चेतनतत्त्वम्। केनोपनिषदि कथितम्।

इह चेत अवेदीत् अथ सत्यम् अस्ति।
न चेत् इह अवेदीत् महती विनष्टिः॥

1. **नञ् तत्पुरुषः**

यदा तत्पुरुषसमासे पूर्वपदं 'न' इति अभावार्थे भवति तदा स्वरात् पूर्वम् 'अन्' व्यञ्जनात्पूर्वं च 'अ' इति भवति। यथा न धर्मः इति अधर्मः, न उत्तमः इति अनुत्तमः, न उपस्थितः इति अनुपस्थितः।

2. **कर्मधारय-बहुव्रीहि-समासयोः भेदः**

यदा विशेषण-विशेष्ययोः अथवा उपमान-उपमेययोः संक्षेपः भवति तदा कर्मधारयसमासः भवति।

**यथा-** **उद्धतस्वभावः = उद्धतः स्वभावः।** **उद्धतस्वभावेन नरः यशः न प्राप्नोति।**

यदा च अन्यपदं प्रधानं भवति तदा बहुव्रीहिसमासः भवति।

**यथा-** **उद्धतः स्वभावः यस्य सः।** **श्वेतकेतुः उद्धतस्वभावः अभवत्।**

## कोऽहं वदतु साम्प्रतम्

**स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम्।**
**ज्योतिः पदार्थज्ञानार्थं कोऽहं वदतु साम्प्रतम्॥**

**भावार्थः** – यः जनः मह्यं सदा स्नेहं ददाति। अहं तस्मै वस्तूनां ज्ञानार्थं प्रकाशं यच्छामि। अधुना विचार्य वदतु अहं कः अस्मि?

## एहि हसाम

**(कक्षायाम् अध्यापकः)**

**अध्यापकः** – (सर्वान् छात्रान् प्रति) – 'क्रिकेटक्रीडायाः मम प्रत्यक्षम् अनुभवः' इति विषयम् आधृत्य निबन्धं लिखन्तु।

(सर्वे छात्राः लेखने व्यस्ताः अभवन्। एकः छात्रः न किमपि लिखति।)

**अध्यापकः** – त्वं किमर्थं न लिखसि?

**छात्रः** – मया लिखितम्।

**अध्यापकः** – किं तत्? दर्शय।

(छात्रः सञ्चिकां ददाति। तत्र लिखितम् – 'क्रिकेटक्रीडा तु वृष्टिकारणात् 'स्थगिता' जाता।')